Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# राष्ट्रस्य महत्त्वं वैदिकग्रन्थेषु प्रायुख्येन वर्णितम्



डॉ .मुकेश कुमार डागरः
(धर्माचार्यः) प्राचार्य,
सिद्धि विनायक कॉलेज,
(सीकर)| राजस्थान,भारत।

**Article Info**
Volume 3, Issue 5
Page Number: 212-232
**Publication Issue :**
September-October-2020
**Article History**
Accepted : 10 Sep 2020
Published : 20 Sep 2020

**सारांशः**– महाराजस्य कर्मवादः तथैव वर्तते सर्वं खलु कर्म ईश्वर प्रीतये विधेयम्। ईश्वरः सर्वं पश्यति। अनेन प्रकारेण कर्तृत्वाभिमानो नो जायते। कर्तृत्वाभिमाने सति बन्धः स्वयमेव भवति।

**मुख्यशब्दः**– राष्ट्रस्य, महत्त्वं, वैदिकग्रन्थेषु, प्रायुख्येन, वर्णितम्, राष्ट्रस्थाः जनाः, वृक्षाः, पादपाः, लताः, वनेचराः, पर्वताः, नद्यः।

---

पद्मश्री श्रीनारायणदास महाराजानां राष्ट्रिय योगदानम् – राष्टस्य महत्त्वं वैदिकग्रन्थेषु प्रामुख्येन वर्णितम्। यद्यपि व्यवहारे निश्चितस्य भूभागस्य राष्ट्रसंज्ञा विधीयते। एकस्मिन् निश्चिते भूभागे जन उत्पद्यते। एकस्मिन् राष्ट्रे कोटिशो जनाः भवन्ति। राष्ट्रस्य शब्देन राष्ट्रस्थाः जनाः, वृक्षाः, पादपाः, लताः, वनेचराः, पर्वताः, नद्यः कीटपतङ्गाश्चावबोध्यन्ते। अर्थात् राष्ट्र जायमानाः सर्वे पदार्थाः राष्ट्रसंज्ञकाः। राष्ट्रविषये यजुर्वेदे अनेके मन्त्राः प्राप्यन्ते तद्यथा -

वृष्ण ऊर्मिरसि राष्ट्रदाराष्ट्रम्मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदाराष्ट्रममुष्मै देहिवृषसेनोसिराष्ट्रदाराष्टम्मे देहि स्वाहा वृषसेनोसिराष्ट्रदाराष्ट्रममुष्मै देहि ।[1]

यस्मिन् राष्ट्रे मनुष्यो वसति तस्य राष्ट्रस्य कृते किञ्चित् कर्म भवति। राष्ट्रस्य समृध्यर्थं प्रयासो अवश्यमेव करणीयः। शुक्लयजुर्वेदे समृद्ध राष्ट्रं कल्पितम्। स च प्रसिद्धो मन्त्रः अधः प्रस्तूयते -

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्र राजन्यः शूर इष व्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः परन्धिर्योषाजिष्णूरथेष्ठाः सभेयो यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षत फलवत्यो न ऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।[2]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

राष्टधर्मः सर्वस्मात् धर्मात् प्रथमो गण्येत। राष्ट्राय किञ्चिदवश्यमेवास्माभिः जीवने कर्तव्यम्। विशिष्य संस्कतज्ञानां, साधूनां पुरोहितानां कर्तव्यं परिगणितम् संहितायां यत्र साक्षात् श्रुतिर्वदति राष्ट्ररक्षायाः प्रमुखं दायित्वं पुरोहितानां भवति यथा -

वयं राष्ट्र जागृयाम पुरोहिता स्वाहा[3]

यद्यपि ये केचनजनाः कार्यं कुर्वन्ति ते सर्वे राष्ट्रस्य समृद्ध्यर्थमेव यतन्ते किं तु प्रबोधनस्य प्रयोजनं भवति। प्रबोधन कार्य पुरोहितानां पार्श्वे भवति। राष्ट्रभावनया सोद्देश्यं कार्य सम्पादनीयम्। राष्ट्ररक्षार्थं समर्थगुरुरामदासः सर्वथा स्मरणीयो विद्यते यः खलु वैराग्यमार्गमनुसरन् राजनीतावपि महत्वपूर्ण योगदानं अदात्। शिवाजी महाराजस्य इतिहासे या गाथा सम्प्रति उपलभ्यते परोक्षवृत्या सा गाथा समर्थगुरुरामदासस्यैव वर्तते। प्राचीनानां राज्यशासकानां शासनस्य क्रमो यदावधार्यते सर्वत्र एकः प्रसिद्धः वैराग्यमयः पुरुषो विभाति यः स्वकीय वैराग्यभावेन राजानं प्रबोधयामास। भारतस्येयं भूमिः साधुपुरुषाणां वर्तते। साधुपुरुषस्य जीवने संग्रहस्य महत्त्वं नावलोक्यते किन्तु संकलितेन धनेन राष्ट्रस्य समुन्नत्यै भवनादीनां निर्माणं कुर्वन्ति।

पाटलिपुत्रस्येतिहासे आचार्यश्चाणक्यः सदा वन्द्यः प्रतिभाति यः स्वकीयया प्रतिभया कुटनीत्या च दुष्टं राजानं राज्यशासनात् पृथक् कृत्वा साधारणं बालकं असाधारणगुणदानेन शिक्षणेन च राजानं नियोजयामस। विद्यया प्रतिभया च मनष्यः असाधारणो भवति नास्ति सन्देहः किंतु वैराग्येन भावेन ततोऽधिकतरः जायते। वैराग्यस्य या भावना ईशापनिषदि प्रतिपादिता यथा -

ईशावास्यमिदं सर्वं यत् किञ्च जगत्याञ्जगत्।

तेन त्यक्तेन भुञ्जीथाः मागृधः कस्यस्विद्धनम्॥[4]

वर्तमान्परिप्रेक्ष्ये वैराग्यस्य प्रतिमूर्तिः श्री नारायणदास महाराजः जगद्वन्द्यो जातः। महाराजस्य सामान्यं प्रबोधनमपि धानाढ्यानां कोशं राष्ट्रकार्याय समुद्घाटयति। इदानीमनेक उद्योगपतयो दृश्यन्ते ये महाराजस्याज्ञया सर्वमसम्भवं सम्भवं कर्तुं शक्नुवन्ति। महाराजस्य दृढो विश्वासो वर्तते धनस्य शुद्धिः दानेन भवति। शुद्धं धनं यदि गृहे कोशे च भवेत् अवश्यमेव तद्धनं कल्याणाय प्रवर्तते। न जनमुवेलयति न च कुमार्गे प्रेरयति तस्मात् सर्वात्मना सर्वप्रयासेन धनस्य शुद्ध्यर्थं समये समये दानं दातव्यम्। महाराजस्य वैशिष्ट्यमत्र प्रामुख्येन द्रष्टुं शक्यते यत् दानं स्वीकृत्य संकलनं सग्रहणञ्च नैव करोति। अन्ये बहवः महाराजा: सम्प्रति दृश्यन्ते ये दानं स्वीकृत्य कोशेषु स्थापयन्ति तथा मिथ्याश्रयेण दातृनपि वञ्चयन्ति। अत्र स्वभावतः प्रश्नो भवति कोऽत्र मिथ्याश्रयः?

भारतदेशे धनस्य करः देयो भवति करवञ्चनायानेके धनाढ्याः स्वल्पं धनं दत्वा अधिकस्य प्रमाणपत्रं (रसीदं) स्वीकुर्वन्ति मन्ये पञ्चविंशतिलक्षरुप्यकानि ददति तथा कोटिरूप्काणां प्रमाणपत्रं करवञ्चनाय (TAX) गृह्णाति किंतु नारायणदास महाराजस्य पार्श्वे इयं पद्धतिः नैव प्रचलति यतोहि धन संकलने महाराजस्य विश्वासो नास्ति यद्धनमायाति तेनैव धनेन सार्वजनिकं कार्य सम्पादयति। सार्वजनिकं यत् किमपि कार्यं भवति सर्वं राष्ट्रियमेव मन्ये। राष्ट्रस्य किस्मन्नपि भूभागे विकासकार्यं प्रचलति न केवलं तेन तस्य विशिष्टभूभागस्य

विकासः सम्पद्यते किंतु समग्रस्य राष्ट्रस्य विकास एव तत्राङ्गीं क्रियते। महाराजस्यैकैकं कार्यं स्मृत्वा मनसि कदाचित् मोह उत्पद्यते किमिदं कार्यं एकेन महापुरुषेण सम्पादितम् अहो महाराजस्य दृढो वैरागः त्यागभावश्च।

महाराजः कथयति राष्ट्रस्य विकास: ग्रामस्य विकासेन भवति। अस्माकं देशे महानगरेषु विकासः श्रूयते दृश्यते च किंतु यावत् कालं ग्रामस्य विकास: नैव भवेत् तावत् राष्ट्रविकासस्य कल्पना व्यर्था प्रतिभाति। ग्रामस्य विकासाय सर्व प्रमुखं कार्यं शिक्षायाः प्रचारः। महाराजः सततं ग्राम्याणां विकासाय तत्परो दश्यते। ग्रामे सर्वाणि वस्तुनि सन्ति किन्तु शिक्षायाः अभावे ग्राम्याः इतस्ततः भ्रमान्ति। अतएव महाराजः शिक्षायाः विकासाय विद्यालयानां, महाविद्यालयानां छात्रावासानां, कन्याछात्रावासानां, चिकित्सालयानाञ्च निर्माणं कृतवान्। प्रदेशे अनेके विद्यालयाः महाराजेन निर्मिताः। यत्र कुत्रापि शिक्षण संस्थाने आसन्दिकानामभावः भवति सद्य एव प्रेषयति। केचन विद्यालयाः महाराजेन निर्मिताः तेषां नामानि लिख्यन्ते -

1. जगद्गुरु रामानन्दाचार्य वरिष्ठ उपाध्याय संस्कृत एवं वेद विद्यालय त्रिवेणीधाम, जयपुर
2. बाबा श्री भगवानदास महाविद्यालय, चिमनपुरा शाहपुरा, जयपुर
3. बाबा गंगादास महिला महाविद्यालय शाहपुरा जयपुर
4. बाबा नारायणदास छात्रावास केशव विद्यापीठ जयपुर, राजस्थान
5. श्री नारायणदास उच्च माध्यमिक विद्यालय साईवाड़, शाहपुरा, जयपुर
6. वैष्णवभूषण राजकीय माध्यमिक विद्यालय धौला, जमवारामगढ़, जयपुर
7. श्री अनोफ बाई विद्यालय चिमनपुरा, शाहपुरा
8. संस्कृत विद्यालय, अजीतगढ़ सीकर राजस्थान
9. राजकीय माध्यमिक विद्यालय मण्डूस्या सीकर
10. राजकीय वरिष्ठ उपाध्याय संस्कृत विद्यालय जसवन्तपुरा, शाहपुरा, जयपुर

पूर्वस्मिन्नध्याये महाराजस्य समस्ते राष्ट्रे यत् कार्यं वर्तते तेषां परिचयो विस्तरेण दत्तः। श्री नारायणदास महाराजस्य कथनं वर्तते ग्रामेषु प्रतिभावन्तः जनाः भवन्ति किंतु सुविधानामभावे, अवसराणामभावे, च ते भ्रमिताः भवन्ति । तस्मात सर्व प्रयत्नेन ग्रामस्य विकासाय कार्यं कर्तव्यम्। ग्रामीणक्षेत्रे उद्योगस्याभावः नास्ति केवलं क्रियान्वयनं कथं भवेत् इति ते न जानन्ति । सर्वकारस्य याः योजनाः भवन्ति तासामुपयोगः सम्यक्तया ग्रामे न दृश्यते।

राष्ट्रविकासस्य मूलं बीजं ग्रामे संनिहितम्। ग्राम्या प्रातः कालात् सायं यावत् स्व स्व क्षेत्रे कृषिकार्य, पशुपालनं च कुर्वन्ति तथापि ते निर्धना, असहायाश्च दृश्यन्ते। तेषां अशिक्षितानां श्रमः मन्ये व्यर्थमेव गच्छति। श्रमिकाणां श्रमस्य मूल्यांकनं सामाजिकैः अवश्यमेव

विधेयम्। अन्यथा अस्मिन् सञ्चारतन्त्रस्य युगे हतोत्साहाः ते कृषिबलाः नैजं कार्यं त्यक्ष्यन्ति राष्ट्रे अन्नस्याभावः भविता। अन्नोत्पादनं बहुप्रयासेऽपि यन्त्रेषु नैव भवितुमर्हति अत: तेषां श्रमिकाणां संरक्षणमवश्यमेव कर्तव्यम्।

महाराजस्याश्रमे धनाढ्यानां यथा प्रतिष्ठा आदरश्च भवति ततोऽधिकं अशिक्षितानां ग्राम्याणां वर्तते। ग्राम्याणां कार्य महाराजः प्रथमं सम्पादयति। महाराजस्य यत् कृत्यं अस्माकं समक्षे भवति प्रायेण सर्वं कार्य ग्रामीणक्षेत्रेषु अङ्गीकृतम्।

महाराजस्य चिकित्सा क्षेत्रे कार्याणामवलोकनं क्रियते - .

1. बाबा श्री नारायणदास हॉस्पिटल अजीतगढ़
2. बाबा भगवानदास चिकित्सालय बलेश्वर, विराटनगर
3. बाबा नारायणदास चिकित्सालय सैंधवा मध्यप्रदेश
4. श्री भूरीबाई चिकित्सालय चिमनपुरा, शाहपुरा, जयपुर
5. श्री नारायणदास चिकित्सालय कांवट, सीकर, राजस्थान

## जगदगुरुरामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालयस्य विचारः परिणतिः सहयोगश्च स्थापना

राजस्थान प्रान्ते रामानन्दसंप्रदायस्यानेके आचार्याः उत्पन्नाः बभुवूः। अनेके द्वाराचार्याः अभूवन् यद्यपि संख्याक्रमे वृद्धि हासश्च जायते तथापि षट्त्रिंशत् द्वाराचार्याः आसन् । तेषु त्रयोदशद्वाराचार्याः राजस्थानप्रान्ते उत्पन्नाः सन्ति - यद्यपि यवनानामाक्रमणं समग्रे भारते वर्षे जातं किन्तु एतदाक्रमणं सर्वस्मादधिकं राजस्थानप्रदेशे गण्यते। श्रीरामानन्दस्य शिष्यप्रशिष्य परम्परायां श्री बालानन्दः अभूत् स्वनामधन्यः श्री बालानन्दः वैष्णवसम्प्रदायस्यैकीकरणं कृत्वा अभूतपूर्व कार्य सम्पादयामास। तस्यपरिणामः विशिष्य राजस्थानप्रदेशे दृश्यते यद्यपि समेषां द्वाराचार्याणां कार्यं कालश्च सुदीर्घः प्रतीयते इतिहासकाराणां मते त्रिंशत् वर्षाणां कालः मन्यते। शतत्रयेषु वर्षेषु एते द्वाराचार्याः देशस्य भिन्न भिन्न भूभागे सम्प्रदायस्य गौरवं वर्धयामासुः। सम्प्रति ये द्वाराचार्याः राजस्थान प्रान्ते प्रादुर्भूताः तेषां संक्षिप्तमध्ययनं क्रियते -

1. जगद्गुरु श्री पीपाचार्यः - १४१७-१५१७ ख्रीष्टाब्दी गागरौनगढ, राज०
2. जगद्गुरु श्री नरहर्यानन्दाचार्यः १४९९-१५९१ गढवाला राजस्थान
3. जगद्गुरु श्री कर्मचन्द्राचार्यः १५००-१६०० दौसा राजस्थानम्
4. जगदगुरु श्री अनुभवानन्दाचार्यः १५०३-१६११ श्री बालानन्दाचार्यमठः, जयपुरम्
5. निवायाचार्यः (श्री टीलाचार्यः) १५१२-१६४२ जगद्गुरु श्री साकेतनिवायाचार्यः । अरणीया राजस्थानम्

6. श्री कीलदेवाचार्यः १५१६-१६१७ गलतातीर्थ जयपुरम्
7. जगदगरु श्री विजयरामाचार्यः १५१६-१६१६ खाड, राजस्थान
8. जगदगरु श्री दिवाकराचार्यः १५३५-१६१० दौसा राजस्थानम्
9. जगदुरु श्री लाहारामाचार्यः १५४५-१६५० अरणीया, राजस्थानम्
10. जगदुरु श्री केबलरामाचार्यः (श्री कूबाचार्यः) १५४५-१७२५ झीथर राजस्थानम्
11. जगदुरु श्री अग्रदेवाचार्यः १५५३-१६५८ रेवासा, राजस्थानम्
12. जगदुरु श्री नारायणाचार्यः १५८७-१६८७ रेवासा, राजस्थानम्
13. जगदुरु श्री राघवेन्द्राचार्यः (श्री खोजी जी) १६३२-१७३२ जोधपुरम्

श्री नारायणदास महाराजः संस्कृतस्य विकासाय अथ च श्री रामानन्दसम्प्रदायस्य विकासाय च तत्परो दृश्यते। श्री नारायणदास महाराजः काठियापरिवाचार्यस्य पदेऽभिषिक्तो वर्तते। वैष्णवाचार्याणां सत्प्रयासेन ४.१२.१९९८ दिनांके काठिया परिवाराचार्य पदे श्री नारायणदासमहाराजः अभिषिक्तो बभूव। अस्य परम्परा अधः प्रस्तूयते -

१. श्रीयुत् खोजी जी महाराजः

२. श्री ब्रह्मदासः

३. श्री रामरमणदासः

४. श्री अर्जुनदासः

५. श्री गोविन्ददासः

६. श्री रामदासः

७. श्री जगन्नाथदासः

८. श्री रामकिशोरदासः

९. श्री नारायणदासः

आनन्दभाष्यसिंहासनारूढः श्री रामेश्वरानन्दाचार्य एकस्मिन् संस्मरणे स्मारयामास यत् श्री नारायणदासमहाराजः वैष्णवकुलभूषणः अथ च सम्प्रदायस्य समुद्धारको भूत्वा सम्प्रति राजते।

श्रीरामेश्वरानन्दाचार्यो लिखति दिनंक २५-०१-१९९७ अस्माकं जीवने प्रमुखं दिनं प्रतिभाति। अस्मिन्नेव दिनांके अपराह्णे श्री रामानन्दाचार्य संस्कृतविश्वविद्यालयविषये नारायणदासेन साकं चर्चा प्रारब्धा। अस्याः चचार्याः प्रारम्भः १९९५ ख्रीष्टाब्दे श्री धाम्नि

जनकपुरे धर्मप्रचारस्य कार्यक्रमे प्रवाचनक्रमे च साँवरियाजी राजस्थाने रात्रौ विश्राम प्रंसगे धर्मसभायां संस्कृतविश्वविद्यालय सम्बन्धिनी चर्चा श्रुता। दिनांक ०१-०६-१९९५ धर्मसभायां रामेश्वरानन्दाचार्येण प्रस्तावः दत्तः जगद्गुरु रामानन्दाचार्यस्य नाम्ना अयं संस्कृविश्वविद्यालयः स्थापितो भवेत। वार्ता आगता गता च। कालान्तरे इलाहबादविश्वविद्यालयस्य दर्शनविभागाध्यक्षेण साकेतवासिना श्री संगमलालपाण्डेयेन पत्रमाध्यमेनाहं (रामेश्वरानन्दाचार्यः) संसूचितः यत् राजस्थान सर्वकारः झटिति संस्कृतविश्वविद्यालयस्य स्थापनां विधास्यति। पत्रेण दृढ प्रतिज्ञोऽहं सर्वकारस्य शिक्षा विभागे पत्राचारं प्रारब्धवान्। अहमदावादस्य सम्प्रदायस्य प्रबोधकाः श्री सम्प्रदायनिष्ठाः महामण्डलेश्वर श्री शिवरामदासमहाराजाः, महामण्डलेश्वर श्री रामावतारदास महाराजाः, प्रभृतयः वैष्णवाश्च पत्राचारं चक्रुः। पुनः द्विशतं वैष्णवानां हस्ताक्षरयुतं पत्रं राजस्थान सर्वकाराय प्रेषितवान्। श्री रामानन्दाचार्यस्य व्यक्तित्वं कृतित्वञ्च पृथक् पृथक् सजीकृत्य प्रेषितवान्। सर्वकारपक्षतः आचार्यस्य विषये अनेके प्रश्नाः जिज्ञासिताः तेषां सर्वेषां वैष्णवाचार्याणां समेकित प्रयासेन समाधानं कृतम्। सर्वकारपक्षतः प्रायेण संतोषप्रदं उत्तरमागतम्। किन्तु कार्यं बृहत् वर्तते एतस्य समाधानं कः करिष्यति? अस्मिन्नेव काले श्री नारायणदासमहाराजः मुम्बई नग-मेकं अष्टोतरशतकुण्डीयं यज्ञं प्रारब्धवान्। यज्ञस्य सत्संगलाभाय श्री रामेश्वरानन्दाचार्यः अन्ये च वैष्णवाः आमन्त्रणं स्वीकृत्य जगः। सत्संगक्रमे २५-०१-१९९७ ख्रीष्टाब्दे पराह्णे श्री नारायणदासमहाराज सर्वमिति वृत्तं विश्वविद्यालयस्य स्थापनाविषयकं श्रावयामास। विषयः गंभीर आसीत अतः होरापर्यन्तं चर्चा प्रचलिता। रामेश्वरानन्दाचार्यस्य संस्मरणानुसारं तस्मिन दिने श्री नारायणदासमहाराजेन साकं एकः भगवन्निष्ठः शिष्यः आसीत स खल सर्वां वार्तां श्रुत्वा महाराजाय विनीत भावेन निवेदयामास महाराज! भवतः संकल्पमात्रेण सर्वं कार्यं भवति इदानीमेव स्नातकोत्तरमहाविद्यालयस्य निर्माणकार्यं सम्पूर्णं जातम् सर्वकारश्च भवतः प्रस्तावानुसारं महाविद्यालयस्य नाम कृतवान्। तया प्रणाल्यः यदि विश्वविद्यालयस्य स्थापना भवेत असम्भवं किञ्चिदपि नास्ति अवश्यमेव जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृत विश्वविद्यालयस्य स्थापनं भवेदेव। गम्भीर मुद्र्या उपविष्टः श्री नारायणदासमहाराजः सद्य एव संस्कृतविश्वविद्यालस्य स्थापनाय स्वीकृतिमदात्। श्री खोजीजी द्वाराचार्येण नारायणदासेन सह श्री रामेश्वरानन्दाचार्यस्य प्रथमः साक्षात्कार आसीत् २५-०१-१९९७ दिनांके प्रथमे साक्षात्कारे एव रामानन्दस्य कीर्ति पताकां जगति पुनः स्थापयामास।

जयपुर अजमेर राजमार्गसंख्या ०८ भांकरोटातः सप्तकिलोमीटर दूरे मदाऊ नाम्नि ग्रामे भव्यप्रांगणे जगद्गुरुरामानन्दाचार्य राजस्थान संस्कृतविश्वविद्यालयः राराजते। नारायणदासस्य सम्प्रदाये या निष्ठा विद्यते तस्याः परिणतिः विश्वविद्यालयस्य भवनेषु द्रष्टुं शक्यते।

मख्यद्वारे श्री अनन्तानन्दाचार्यद्वारम्, श्रीपीपाजीचार्य द्वारम्, श्री कबीरद्धारम श्री रैदासद्वारम् चांकितम्।

भवनेषु

श्री योगानन्दाचार्य भवनम्।

श्री सुखानन्दाचार्य भवनम्।

श्री खोजीजी शोधसंस्थानम्।

श्री नरहर्यानन्दाचार्य भवनम्।

श्री सुरसुरानन्दाचार्यभवनम्।

श्री अग्रदेवाचार्य भवनम् (ग्रन्थागारः)

विश्वविद्यालय स्थापत्यं दृष्ट्वा अनुमीयते यत् रामानन्दसंप्रदायस्य राजधानी इव अयं विश्वविद्यालयः विलसति।

कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन।

स्वर्गस्थिता ये पितरोऽपिधन्या येषां कुले वैष्णवनाम धेयः॥

महाराजस्य इच्छाशक्ति दृढा वर्तते। राजस्थानप्रान्तस्य भूतपूर्वः मुख्यमन्त्रीमहोदयः एकस्मिन्नुद्घाटनक्रमे श्री नारायणदासमहाराजं निवेदितवान् यत् विश्वविद्यालयस्य स्थापना भविता तत्र सर्वकारः वाञ्छति भवनं निमार्य कश्चिदद्यात्। महाराजः मनसि बीजारोपणं कृत्वा जगद्गुरुराजस्थान संस्कतविश्वविद्यालयस्य स्थापनासमितेः पञ्चीकरणं कारयित्वा १९९८ ख्रीष्टाब्दे आयकरस्याधिनियम ३५A मध्ये धनदातृभ्यः आयकरात् शतप्रतिशतं लाभ: स्वीकृतः।

प्रस्तामङ्गकृत्य महाराजः "जगद्गुरु रामानन्दाचार्य राजस्थान संस्कृतविश्वविद्यालय " इति प्रस्तावं प्रेषयामास किन्तु सर्वकारस्य शासनेऽपि अनेके धर्मनिरपेक्षवादिनः भवन्ति तेषां मते सम्प्रदायस्य प्रचारः राष्ट्रहिताय नास्ति किन्तु सत्यसंकल्पेन महाराजेन सर्वकारस्य सर्वाः समस्याः खण्डिताः रामानन्दस्य शिष्याः सर्वेषु वर्णेषु भवन्ति अत्र वर्णभेदः, वर्गभेदश्च नैवाङ्गीक्रियते।

सर्वकारपक्षतः ०४-०८-२००५ ख्रीष्टाब्दे भवननिर्माणाय विज्ञप्तिः समागता। महाराजः सर्वं प्रस्ताव स्वीचकार राजस्य सर्वकारस्य (७९.५५ हेक्टयर) प्रायेण ३०० बीघा परिमाणमात्रं भूमिं विश्वविद्यालयाय १०.०४.२००३ मध्ये समर्पयामास। महाराजः प्रसन्नचित्तः सोत्साहः शुभे मुहुर्ते दिनांके १७.०४.२००३ ख्रीष्टाब्दे शिलान्यासं कृतवान्। शिलान्यास कार्यक्रमे राजस्थानप्रान्तस्य राज्यपालः श्री अंशुमानसिंहः, श्री अशोकगहलोतः (मुख्यमन्त्री) उपमुख्यमन्त्री श्रीमती कमला च उपस्थिता आसीत्। राजस्थान सर्वकारः राजस्थान संस्कृत अधिनियम १९९८ पासीकृत्य ०६ ०२-२००१ तः राजस्थान संस्कृतविश्वविद्यालयस्य शुभारंभं भादृकभवनेषु कृतवान्। अस्य विश्वविद्यालयस्य प्रथमः कुलपतिः पद्मश्री डॉ० मण्डनमिश्रः पदमलञ्चकार। पदनन्तरं ३०.०५.२००२ तः ३०.०५.२००५ पर्यन्तं प्रो० सत्यदेवमिश्रः कुलपतिपदमलंचकार वर्तमाने विश्वविद्यालये -

१. वेदवेदांगसंकायः

२. साहित्य एवं संस्कृति संकायः

३. दर्शन संकायः

४. श्रमणविधा संकायः

५. आधुनिकज्ञानविज्ञान संकायः

६. शिक्षासंकायश्च

विश्वविद्यालये नवपीठानि स्थापितानि वर्तन्ते २५-०१-२००५ दिनांके नियमः सर्वकारेण स्वीकृतः।

1. जगद्गुरुरामानन्दाचार्य वेदान्तपीठ्म
2. सर्वा जयसिंह ज्योतिर्विज्ञानपीठ्म
3. मधुसूदन ओझा वेदविज्ञानपीठम्
4. म०म० गिरिधर शर्मा चतुर्वेद व्याकरण पीठम्
5. भट्टमथुरानाथशास्त्री साहित्यपीठम् ।
6. पं० नित्यानन्दशास्त्री आधुनिक साहित्यपीठम्
7. पट्टाभिराम शास्त्री मीमांसापीठम्

अनुबंधानुसारं प्रथमचरणस्य निर्माणकार्य प्रायेण सम्पूर्णम्। निर्माणकार्यस्य यमचरण दिग्दर्शनं समासेन करिष्यते।

प्रशासनिकं भव्यं भवनं प्रवेशद्वारस्य समीपे वरीवर्ती। यस्मिन् विशाल भवने प्रशासनिकं सर्वं कार्यजालं प्रसृतं वर्तते। प्रशासनिक भवनं वास्तुशास्त्रदृष्ट्या निर्मितं यस्मिन् चत्वारि द्वाराणि चतुर्षभागेषु संरचितानि सन्ति। रामानन्दसम्प्रदायस्य तिलकं कीर्तिपताकां च प्रकटयति। भगवतः श्री रामानन्दस्य प्रतिमा प्रशासनिकभवनस्य शोभा भृशं वर्धयति।

षण्णा विभागानां भवनं परिसरेऽस्मिन् भगवतो वेदस्य षड्भागानां साक्षात्कारं कारयति। विभागानां भवनं एकसमं कलेवरं बिभर्ति । अत्रापि भवनेषु रामानन्दसम्प्रदायस्याचार्याणां नामानि अङ्कितानि विद्यन्ते।

आवासस्यापि परिकल्पना परिसरे द्रष्टुं शक्यते तद्यथा कुलपतिः आवासः, कुलसचिवावासः, पुस्तकालयः, शोधसंस्थानम्, छात्रावासः, छात्रावासीय अधीक्षकाणामावासः, अतिथिगृहम्, कर्मचारिणामावासः, अधिकारिणामावासः, प्राध्यापकानामावासः, क्रय-विक्रयकेन्द्रम्, औषधिविक्रयकेन्द्रम्, जलापूर्तये च विस्तृतं एकलक्षलीटर परिमापकं जलकोशं, बैंकभवनम्, पत्राचारभवनं च सज्जीकृतं वर्तते।

निर्माणकार्य जयपुरस्य वास्तुकलायाः स्थापत्यस्य च दर्शनं सर्वत्र भवति प्रायेण पाषाणमयं भवनं राजमार्गात् जनानां मनः मोहयति। एकदा समग्रं निर्माणकार्यं दृष्ट्वा मनसि महान् तोषः जायते। निर्माणकार्ये सौन्दर्यस्य वास्तुकलायाः यथा सम्मिश्रणं विभाति तथैव दाढ्र्यं च वर्तते।

निर्मितं क्षेत्रफलं (दो लाख पैंसठ हजार वर्गफुट) पञ्चषष्टिसहस्राधिकद्विलक्षपरिमितं वर्गफुट मात्रं वर्तते।

महाराजस्य श्री नारायणदासस्योत्साहं कार्यकलापं च समाकलय्यानुबन्धानुसारं राजस्थानस्य मुख्यमन्त्रिमहोदयाभिः २७-०६-२००५ खीष्टाब्दे एकमादेशं पासीकृत्य विश्वविद्यालयस्य नामपरिवर्तनं कृत्वा जगद्गुरुरामानन्दाचार्य राजस्थान विश्वविद्यालयः इति कृतः। संस्कृतस्याक्षुण्ण परम्परायाः विकासाय प्रचाराय च भारत सर्वकारः पञ्चकोटि रूप्यकाणामनुदानं दत्तवान्। एभिः द्रव्यैः वेधशालयाः निर्माणकार्यमथ च श्रौत यज्ञशालायाः निर्माणं भविता। महाराजस्य भावना वर्तते विश्वविद्यालये शास्त्रचिन्तकाः आचारनिष्ठाः संस्कृतानुरागिणः प्राध्यापकाः नियोजिताः भवेयुः। प्रायेण तथाविधाः आचार्याः प्रथमचरणे चिताः सन्ति।

विश्वविद्यालयस्य परिसरे छात्रा अध्यापकाश्च गुरुकुलस्य भावनां सार्थीकुर्वन्तः वसन्ति। प्रातः कालात् सायन्नं यावत् छात्राः अध्यवसायेरताः दृश्यन्ते। किं बहना विदेशस्थाः केचन छात्राः पठनाय समागताः। विश्वविद्यालयस्य सर्वस्मिन् कार्ये श्री नारायणदासमहाराजानां यशोगानं श्रद्धया स्मर्यते।

काले काले शुभेऽवसरे यदा श्रीमहाराजानां पदार्पणं भवति सहस्रशोजनाः भक्तिभावेन आकृष्टाः भवन्ति। महाराजस्यागमनं मन्ये पुण्याय कल्पते। महाराजानां दृष्टिपातमात्रेण दुःखिताः जनाः दुःखात् मुच्यन्ते। सहस्रवर्षावधौ कश्चन एतादृशः नारायण एव नररूपं धृत्वा पृथिव्यामवतरति।

अद्य विश्वविद्यालयस्य सर्वेषु विभागेषु छात्राः मनोभावेन अध्ययनं कुर्वन्ति। परिसरे च हनुमतः मन्दिरं वर्तते यत्र पूजकः समयानुरोधेन नीराजनं, पूजनञ्च करोति। मन्दिरे च उत्सवः आयोज्यते। सर्वे छात्राः अध्यापकाश्च कार्यक्रमे भागं गृह्णन्ति।

### संस्कतस्य संस्कृते च संरक्षकाः

संस्कृतं महाराजस्य सदा हृदि वसति। महाराजस्य दृढो विश्वासो वर्तते यत् संस्कृतं विना राष्ट्रस्य विकासः नैव सम्भवति कदाचित् विकासः भवेदपि किन्तु तस्मिन् विकासे भारतस्य गन्धः, मूल्यं च नावलोक्यते। समग्रे राष्ट्रे यस्मिन् भूभागे व तन नक्सल संस्कृतस्य हासो जातः तत्र तत्र आतंकवादः, नक्सलवादः, व्यभिचारः, कुतर्कश्चाति वेगेन प्रसृतः। धर्मान्तरणं तत्रैव द्रष्टुं शक्यते। संस्कृतस्य संरक्षणं भारतदेशे अनादिकालात् महान्तः, साधवः च कुर्वन्ति यतोहि मठश्छात्राणां निलयः इति वाक्यं प्राचीनमेव वर्तते। भारते उपासनायाः नैकाः पद्धतयः प्रचलिताः सर्वासां पद्धतीनां संरक्षणं स्वस्मिन् मठे मन्दिरे च भवति। साधवः विद्वांसमाचार्यमाहूय मठेषु स्थापयन्ति वेतनादिदानेन तानाचार्यान् पुष्णन्ति ते आचार्याः सम्प्रदायस्य रक्षार्थं वेदान्तादिशास्त्राणामध्यापनं कारयन्ति। छात्राणां कृते मठेषु मन्दिरेषु च आवासः, भोजनं च निःशुल्कं दीयते स्म। संस्कृतस्येयं परम्परा सम्पूर्णे भारते प्राचीनकालादेव प्रवर्तते। इदानीमपि मन्दिरेषु मठेषु च छात्राणां कृते व्यवस्था दृश्यते किं बहुना मम शोधकार्यस्य मार्गनिर्देशकाः यजुर्वेद - ऋग्वेद - साहित्य-धर्मशास्त्राचार्याः स्वनामधन्याः डॉ० शम्भु कुमार झा महोदयाः अपि जगदीशनारायण ब्रह्मचर्याश्रम आदर्शसंस्कृतमहाविद्यालयस्य गुरुकुल पद्धतौ तत्रैव छात्रावासे उषित्वाध्ययनं कृतवान्। उत्तरे भारते दक्षिणे च शास्त्राध्ययनस्य विशुद्धा परम्परा महात्मभिः साधुभिश्च संरक्षिता मन्ये। काश्यां

(वाराणस्यां) मन्दिरे मन्दिरे विद्यालयः प्रसिद्ध आसीत् कुत्रचिदस्ति च। तेषु मन्दिरेषु उद्भट्टाः विद्वांसः विद्याध्ययनं चक्रुः। इमां परम्परामवागाहयन् श्री नारायणदासमाहाराजः संस्कृतस्य विकासाय संप्रदायस्य च गौरवाय अद्भुतं कार्यं कृतवान्। यद्यपि महाराजस्य शिक्षाक्षेत्रे विशिष्टं योगादानमङ्गीक्रियते विशिष्य संस्कृत विद्यायाः कते। चिमनपुराग्रामे आधुनिकः महाविद्यालयः तेन महाराजेन निर्मितः किन्तु तत्रापि संस्कृते द्रष्टुं शक्यते। स्नातकोतरमहाविद्यालयः विद्यते यस्मिन् आधुनिककालस्य प्रायेण उद्योगसाधकाः सर्वे विषयाः अङ्गीकृताः। महाविद्यालयस्य परिसरे संस्कृतस्य संस्कृतेश्च साक्षात् दर्शनं भवति। बहूनि सुभाषितानि आधुनिक सन्दर्भे संस्कृत भाषायां लिखितानि वर्तन्ते। अस्मिन् महाविद्यालये सहशिक्षायाः समर्थनं वर्तते। संस्कृतं विना मन्दिरस्य, मठस्य च सामन्यमपि कार्यं नैव भवति। पूजायां संस्कृतस्यैव श्रीकाः, स्तोत्राणि च गीयन्ते।

नीराजने च संस्कृतस्य स्तोत्रं पठ्यते। संस्कृतिः मन्दिरेषु प्रतिपलं द्रष्टुं शक्यते। भारतस्य या प्राचीना संस्कृतिः वर्तते। तस्याः अनेके अंशाः साधूनां जीवने संम्मिलिताः सन्ति। ब्राह्म मुहूर्ते उत्थाय प्रातः स्मरणं, स्नानं, सन्ध्यादिकं च संस्कृतेः प्रारूपं वर्तते।

अत्रेदं ध्येयं समाजे यत्किमपि भवति आचरणं सर्वं संस्कृतिनैव भावितमर्हति । यथा कश्चित् पिता कन्यां विक्रीणीते तस्य वंशे सदा विक्रयणं कर्म भवति तथापि धर्मे तस्य कार्यस्य प्रतिष्ठा नास्ति।

संस्कृति सदा शास्त्रमूला भवति। शास्त्रे यस्य व्यवहारस्य गंभीरं चिन्तनं कृत्वा स्थानमिष्टं तदेव संस्कृतिः। शास्त्रनिर्मूलस्य व्यवहारस्य क्रियाकलापस्य च संस्कृतिमूले स्थानं न स्वीकरणीयम्। संस्कृतेः स्रोत: वेदादिकं शास्त्रं वर्तते। यस्मात् समागता संस्कृतिः सहस्रवर्षेभ्यः सामाजिकानां सकलं सांसारिकं मनोरथं पूरयन्ती पारलौकिकञ्च सुखमैश्वर्यं प्रयच्छति।

श्री नारायणदासमहाराजः धर्मप्रचारकः, संरक्षकश्च विद्यते। धर्मस्य साक्षात् संबन्धः संस्कृत्या साकं मन्यते। संस्कृतौ प्रत्यक्षतः परोक्षतश्च धर्मोभवत्येव। महाराजः स्वकीयाचरणेन, व्यवहारेण, क्रियाकलापेन च संस्कृतस्य संस्कृतेश्च मार्ग प्रदर्शयति।

संस्कृतिः प्रामुख्येन वेदमूलिका अस्माभिः अङ्गीक्रियते। वेदस्य चरमोद्घोषः वर्तते। सह - सह अस्तित्वस्य भावना। यजुर्वेदे षट्त्रिंशतमेऽध्याये प्रायेण संस्कते: सारांशो निगदितः। यद्यपि संस्कृतिः वैदिकी वर्तते नास्ति सन्देहः। यजुर्वेदे साक्षात् मन्त्रांशो वर्तते -

"सा नो संस्कृतिप्रथमा विश्ववारा"[5]

अस्माकं पुरातना संस्कृतिः विश्वस्य प्रथमा अर्थात् आद्या वर्तते। यस्यां संस्कृतौ विश्वबन्धुत्वस्य भावना सर्वोपरि राजते।

दृतेदं ह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षा महे॥

दृते दृहं मा ज्योक्ते सन्दृशिजीव्यासम् ज्योक्ते सन्दृशिजीव्यासम्॥[6]

मन्त्रेऽस्मिन् ऋर्षिर्वदति हे परमेश्वर! माम् सर्वे जन्तवः देहधारिणः मित्रस्य सख्युः नेत्रेण पश्यन्तु। सर्वे मम सखायः सन्तु। यथा एकः सखा अपरं सखायं दृष्ट्वा हृष्टो जायते तथैव सर्वे प्राणिनः माम् प्रार्थकं दृष्ट्वा प्रसन्नाः भवन्तु। तथाहमपि सर्वान् चराचरान् मित्र दृष्ट्या द्रक्ष्यामि।

अथवा मित्रो देवः दिनस्य देवता कदाचित् सूर्यपर्यायः यथा सः मित्रोदेवः पक्षपात राहित्येन जगत् पश्यति तथैव सर्वे माम् पश्यंतु।

अनेन प्रकारेण समाजे कलहस्यावसर: नोदेति।

न हिंस्यात् सर्वभूतानि संसारे सर्वे मे मित्राणि सन्ति इयं बुद्धि: यदि सर्वदा तिष्ठेत् कथं कलहः स्यात्। महाराजः श्री नारायणदासः सर्वान् जनान् मित्र भावेन पश्यति तथा शिष्यसमुदायानपि उपदिशति।

पुनः तस्मिन्नेवाध्याये भगवान् वेदः सर्वान् मनुष्यान् आदिशति संसारे केवलं मनुष्याः एव सुखिनो न भवन्तु अपितु कृमिकीटपतंगानामपि कल्याणमस्तु। इयं भावना वेदे प्राप्यते तद्यथा -

यतो यत: समीहसे ततोऽनो अभयंकुरु।

शन्नः कुरुप्रजाभ्योऽभयन्नः पशुभ्यः॥

पुनस्तस्मिन्नेवाध्याये -

शन्नो अस्तु द्विपदे शञ्चतुष्पदे॥

मन्त्रस्य प्रभाव: महाराजस्य जीवने प्रत्यक्षतो द्रष्टुं शक्यते। पशु पक्षीणां रक्षणार्थ महाराजः दृढः प्रतिज्ञः भवति ग्रीष्म? विशेषेण कपोतादीनां कृते जलस्थापनं दृश्यते। शिष्याश्च महाराजस्याचरणं दृष्ट्वा उपदेशं श्रुत्वा, आदेशं मत्वा च भवनोपरि पात्रेषु जलानि स्थाप्यन्ते तत्रैव खलु अन्नानि च विकीर्यन्ते।

महाराजः उपदेशादधिकं आचरण पालनेन सामाजिकान् शिक्षयति। कथनस्याभिप्रायो वर्तते आचरणं प्रमुखं भवति।

महाराजस्य स्थाने समये समये ब्राह्मणवटुकानां कृते यज्ञोपवीतस्यार्थात् उपनयनस्यायोजनमपि भवति। महाराजस्य मनसि प्रबला चिन्ता वर्तते समाजे उपनयन संस्कारः प्रायेण लुप्तप्राय एव कदाचित् विवाहात् प्राग्दिवसे उपनयनं श्रूयते। शनैः शनैः इयं विरूपा संस्कृतिः समाजस्य अंगभूता भवेत् तदर्थं संस्कारस्य आयोजनं भवति। उपनयनं विवाहस्य प्रमाणपत्रं नास्ति अपितु वेदाध्ययनस्य विप्रत्वसिद्धये चायं संस्कारः।

महाराजस्य प्रयासेन जनजागरणमभूत् तथा अनेकत्र कालेन उपनयनं सम्पद्यते।

कतिचिद्दिनानि यावत् त्रिवेणीमध्ये उषित्वा संस्कृतेः ज्ञानं भवितुमर्हति । अनेके पण्डिताः तत्र आश्रमे वसन्ति ये शास्त्रमर्मज्ञाः सन्त्येव तेन सह संस्कृतेश्च सम्यक् ज्ञातारो भवन्ति। अनेके वृद्धाः महात्मानः व्यवहारे सन्दिह्यमाने स्वकीयानुभवबलेन च ग्राम्याणां सन्देहं निवारयन्ति। सतां संगतिः धर्मपालनाय संस्कृते: संरक्षणाय च मन्यते।

## पर्यावरणस्य योगदानम् -

प्रकृतेः समर्चकाः प्राचीनकालादेव मनुष्याः सन्ति। किन्तु विकासवादस्य साम्प्रतिके धावमाने युगे मनुष्याः प्रकृतेः विमुखाः जाताः। सर्वत्र धाव ताता यशोविजयमभिलषन्तः मनुष्यः प्रकृतिमपि जेतुमभिलषन्ति ते न जानन्ति वयमपि प्रकृतेः पुत्राः एव। संसारे यानि

वस्तूनि दृश्यन्ते प्रकृतिना मनुष्याणां कल्याणाय दत्तानि। मनुष्याणां लोभात्मिकाः प्रवृत्तयः प्रकृति छेतुमुद्यताः दृश्यन्ते। सर्वत्र अर्थविज्ञानस्य प्रचारः प्रसारश्च श्रूयते। अर्थलाभाय पर्यावरणस्य समस्यापतिता। पर्यावरणं कः रक्षयिष्यति?

परितः आवरणं पर्यावरणम्। जीवस्य परितः चतुर्दिक्षु यदावरणं वर्तते भौतिकं आवरणं तस्य संरक्षणमावश्यकम्। यद्यपि आधुनिके पर्यावरणग्रन्थे अनेके विषयाः समाविष्टाः सन्ति तथापि महाराजस्य योगदानं यस्मिन् क्षेत्रे वर्तते तेषां समासेन चर्चा कुर्मः।

पर्यावरणस्य हानिः, दोहनं च अज्ञानेन, मोहेन च मन्यते। मोहग्रस्तो मनुष्यः स्वार्थलाभाय वनानि छिन्दति अज्ञानेन च द्रव्यलोलुपो भूत्वा व्याघ्रादीन् वनेचरान हन्ति अत एव अज्ञानध्वान्तये महाराजः शिक्षायाः कार्यक्रमं चालयति। विद्यालयस्य निर्माणे महाराजः वदति शिक्षा सर्वासां समस्यानां निदानम् वर्तते। महाराजस्य सत्प्रयासेन शिक्षायाः नादघोषेण च वनानां, वनेचराणां च संरक्षणं सुनिश्चितम् । यस्मिन् क्षेत्रे एकोऽपि वृक्षः सौभाग्यबलात् दृष्टि गोचरो न भवति स्म तत्रैव छात्राणां स्वल्पेन श्रमेण वनानि दृश्यन्ते। विद्यालयेषु वृष्टिकाले वृक्षारोपणस्य कार्यक्रमः सर्वकारपक्षात् प्रचलति तस्मिन् शुभे काले सहस्रशः वृक्षाः छात्रैः रोप्यन्ते। वनमहोत्सवस्य कार्यक्रमे च छात्राः सोत्साहं भागं गृह्णान्ति। पादपानां पात वर्द्धनेन तस्मिन् क्षेत्रे कूपादिषु वर्षपर्यन्तं जलमुपलभ्यते। तडागेषु च जलानां संग्रहः दृश्यते।

महाराजः जनानमुत्साहवर्द्धनाय सर्वत्र स्वकीयेन हस्तेन वृक्षारोपणं करोति तदनु शिष्याः स्वयमेव प्रवृत्ताः भवन्ति स्वकीये प्रवचने महाराजः वृक्षस्य महत्त्वं शास्त्रोद्धरणपूर्वकं प्रकाशयति वृक्षः जडरूपः साक्षात् ईश्वर एव अस्माकं पालनाय देव देहधराः एते वृक्षाः सन्ति तस्मात् जलदानेन पूजनेन च वृक्षाः संरक्षणीयाः। राजस्थानप्रान्ते शमीवृक्षस्य उपलब्धिं प्रायेण भवति। शमी वृक्षः लोके खेजड़ी इत्यभिधानेन प्रसिद्धः। अस्य वृक्षस्य कल्पतरुरूपेण राजस्थाने प्रसिद्धिः श्रूयते। महाराजः इतिहासपक्षस्यापि समाजे उदाहरणं प्रस्तौति यथा वृक्ष संरक्षणार्थं विश्नोई परिवारस्य काञ्चनस्त्रियः प्राणानामाहुतिं दत्तवत्यः। अतः अस्माभिः वृक्षाः सर्वदा संरक्षणीयाः।

वक्षसंरक्षणेन जलसंवर्द्धनं स्वतः भवति पुनश्च वनेचराणां स्वातन्त्र्यं जायते। महाराजः साक्षात् स्वयमेव उपदेशकः अस्ति। महाराजस्यादेशं सर्वे सामाजिकाः

श्रद्धया पालयन्ति तथापि सम्यक् शिक्षणाय, उपदेशाय च महाराजः जगदुरुरामानन्दाचार्यस्य जीवनवृत्तं कौटिरूप्यकैः निर्माय दूरदर्शनमाध्यमेन प्रसारितम् । तस्मिन् जीवनवृत्तेः महाराजः श्री रामानन्दः बहुविधमुपदेशं प्रायच्छत्।

अद्य संस्कृविश्वविद्यालयस्य परिसरे वृक्षाणां विकासः महाराजस्य सत्प्रयासेनैव द्रष्टुं शक्यते।

१. पादपसंरक्षणम्

२. जलसंरक्षणम्

३. वनेचराणां संरक्षणम्

४. कपोतादीनां संरक्षणम्

महाराजः सदा उपदेश माध्यमेन पर्यावरणस्य रक्षणार्थं पर्वतादीनामपि संरक्षणं प्रतिपादयति। महाराजस्य विश्वासो वर्तते

## जलाश्य, गोपालनं निवारणश्च अस्प्रश्यता निरुपणम्

शास्त्रप्रमाणकाः वयम्। शास्त्रेषु गोपालनस्य महत्त्वं सर्वत्र पठितुं शक्यते।

शास्त्रं वदति -

गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम्॥

तथा चान्यत्र -

गावो विश्वस्य मातरः।

अस्य विश्वस्य प्रतिष्ठायै गोपालनं सर्वैरेव विधेयम्। व्यवहारतः माता जनयति सुतम् किन्तु अत्र गोमाता वत्सतरी च गोः सकाशाज्जायते किन्तु शास्त्रानुशासनेन प्रत्ययः दृढो भवति यत् दृश्यमानस्य विश्वस्य समुत्पत्तिः गोः सकाशाद् भवति। वेदप्रमाणात् न केवलं दृश्यमानस्य विश्वस्य समुत्पत्तिः तस्याः सकाशात् कल्प्यते अपितु देवादीनामपि समुत्पत्तिः गोभ्य एव जायते। शुक्लयजुर्वेदस्य प्रथमेऽध्याये प्रथमे मन्त्रे च गवां महत्त्वं स्वीकृतम्। दर्शयागस्य द्रव्यं -

ऐन्द्रं दधि अमावास्यायाम्।
एन्द्रं पयः अमावास्यायाम्।

दधि - पयसोः लाभः गोभ्यः एव भवति। गोदोहनस्य प्रकारश्च तत्रैव दत्तः। यदा यजमानः गोदोहनं कृतवान् पृच्छति याज्ञिकः - कामुधुक्षः? कामधुक्ष इति पदेन प्रश्नः कृतः कां गाम् दुग्धवानसि। अस्योत्तरं अग्रिमे मन्त्रे प्रदत्तम् -

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः।
इन्द्रस्त्वा भागं सोमेनातनच्मि विष्णो हव्यं रक्ष॥[7]

सा गौः विश्वस्यायुः जीवनं वर्तते। विश्वशब्दः सर्व पर्यायः सर्वादिगणे च पठितः। विश्व इत्युक्ते क्षुद्रादारभ्य ब्रह्मपर्यन्तस्य परिकल्पना क्रियते। संसारे देहधारिणां कृते भोजनस्यावश्यकता भवति तच्च भोजनं संसारायालं मन्यते अत एव भगवान् मनुः प्राह -

अग्नौ प्रस्ताहूतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः॥[8]

अयं भावः गोघृतेन यज्ञः सम्पाद्यते आहुतिर्दीयते तया आहुत्या अन्नमुत्पद्यते संसारस्य चावस्थितिः भवति। अत एव प्रोक्तम् -

गावो विश्वस्य मातरः।

गवां मध्ये सर्वासां देवतानां वास भवति गोदर्शनात् तीर्थाटनस्य फलं लभते । शास्त्रे गोविकार: गव्यम् इति भणितम्।

गोपयसोर्यत् गो शब्दात् पयस् शब्दात् च यत् प्रत्ययः। गव्यपानस्य कर्मकाण्डे प्राथम्यं भजते। अधिकार प्राप्त्यर्थं पञ्च गव्यप्राशनं भवति। पागले गोटा गोतं, गोदधि, गोमूत्रम्, गोमयञ्च। एतेषां पञ्चद्रव्याणां शास्त्रोक्त विधानेन सम्मिश्रणं कृत्वा पानं भवति।

शरीरस्थं निखिलं पापं पञ्चगव्यपानेन दहति तथा च स जनः यज्ञेषु अधिकृतो जायते। सपापो जनः यज्ञेषु अधिकारं न प्राप्नोति। श्रीमद्भागवते अखिलब्रह्माण्डनायकः भगवान श्री कृष्णः बाल्यकालादेव गोपालनं चकार भारतीय धर्मव्यवस्थायां गोपालनात संरक्षणाच्च विशिष्टः कश्चन धर्मः नास्ति। श्राद्धप्रकरणे मृत्योः प्राक् वैतरणीदानस्य माहात्म्यं श्रूयते गोदानात् अत्युत्कटात् पापादपि मुक्तो भवति तस्मात् तीर्थेषु यज्ञेषु च गोदानं प्रशस्तम्। किं बहुना द्रव्यमूल्यकां गामपि दानं भवति। गोदर्शनात् स्पर्शनात् पूजनात् गोग्रासदानात् च सर्वं मंगलमुपजायते।

महाराजस्य गोशालायां सहस्रशो गावः वर्तन्ते प्रायेण प्रति संवत्सरं प्रसूयन्ते। गोसेवार्थं अनेके सेवकाः नियुक्ताः सन्ति। ते सर्वे यथाकालः गाः पालयन्ति। गोदोहनस्य च सम्यक् व्यवस्था वर्तते। वत्सानां पानार्थं दुग्धं परित्यजय दोहनं तत्र भवति। महाराजस्य गोशालायां सर्वेषां ग्राम्याणां सहयोगः वर्तते । ग्रामीणाः गोग्रासं प्रेषयन्ति।

श्रूयते एकदा एकः धनाढ्यः सम्पन्नः त्रिवेणीधामागत्य गोशालायाः सरस्य क्रियमाणं व्यय भारं ज्ञातवान्। स धनादयः गोशालायाः एकवर्षस्य पर्ण भारे वो, स्वीकृतिं अदात्। महाराज श्री नारायणदासः धनाढ्यस्य प्रस्ताव प्रत्वा खिन्नोऽभवत्। भक्तानां समक्षं प्रवचनं कृतवान् -

गोशालायां सर्वेषां येन केन प्रकारेण सहाय्यं प्रयच्छति। सर्व गोग्रास सन्ति अनेन प्रकारेण सामाजिकानां साक्षात संबन्धः स्थापिता भवति । जनसहयोगस्य उत्कष्टमदाहरणं द्रष्टुं शक्यते। अनेन माध्यमेन जनजागरण स्वभावतः उत्पद्यते। धर्मकर्मणि अधिकाधिकानां जनानां उत्साहवर्द्धनं कर्त्तव्यम्। एकस्मात् धनाढ्यात् धनग्रणेन साधारणाः जनाः धर्मस्थानात्, धर्माच्चोन्मुखाः भवन्ति । तेषां मनसि असंतोष उत्पद्यते। एतस्मात् कारणाय गोशालायाः व्यवस्था जनसहयोगेनैव भविता। धर्मः धनाढ्याना निधिर्नास्ति। धर्मे समेषां अधिकारः परमात्मना प्रदत्तः। महाराजस्य गोपालनं आदर्शभूतो विभाति स्वयमेव स्वहस्तेन प्रत्यह्नि प्रात: गोग्रासं प्रयच्छति महाराजः।

त्रिवेणधाम्नि गोशालायाः दर्शनं तीर्थादधिकं पुण्यप्रदं वर्तते। गोशालायामेव वषभाः सन्ति। वत्सानां वत्सतरीणाञ्च कृते पृथक् स्थानं वर्तते तत्रैव याः गावः दुग्धदाने असमर्थाः वृद्धाश्च, रोगग्रस्ताः सन्ति तासां चिकित्सायाः प्रबन्धः स्ताः साया: महाराजेन कतः। पशुचिकित्सक: समयेन चिकित्सां विदधाति।

जलाशयानां संरक्षणेऽपि महाराजस्य योगदानं श्रूयते। समग्रे राजस्थानप्रान्ते जनानां दृढो विश्वासः वर्तते यत् महाराजस्य काचित सिद्धिः विद्यते विशिष्य जलविषये। महाराजः अस्मिन् मरुप्रदेशे च जलाशयानां निर्माणे अग्रगण्यः प्रतिभाति।

जगद्गुरुरामानन्दाचार्य राजस्थान संस्कृतविश्वविद्यालयस्य परिसरे एकः कपः महाराजस्य कृपया जलपूर्णो वर्तते। अद्यानेके गृहस्थाः महाराजस्य समाप आगत्य कूपखननाय महाराजस्यानुमतिं आशीर्वचनं च गहीत्वैव कार्यं कर्वन्ति। महाराजः स्थानं निर्दिशति तस्मिन् निर्दिष्टे स्थले अवश्यमेव जलं प्राप्यते। महाराजस्य आशीर्वचनेन कृषकानां जलसमस्यानां समाधानं जायते। महाराजः स्वकीयप्रवचने जलसंरक्षणाय वृक्षाणां विकासाय विशेषेणोपदेशं प्रयच्छति। पादपानां वर्धापनेन वरुणो देवः प्रीणाति इन्द्रः प्रसन्नो भवति पर्जन्यश्च वर्षति ।

**अस्पृश्यता निवारणम् -** श्री रामानन्दः स्वकीयजीवने काले एव अस्पृश्यतायाः निवारणं चकार। रामानन्दसंप्रदायस्य विकासस्य मूलं बीजं वर्तते -

सर्वे प्रपत्तेरधिकारिणो मता:[9]

अयं भावः भक्तिमार्गे न कोऽपि नीचः भवति न च कश्चिदुत्तमः। रामानन्ददिग्विजय यात्रा प्रसंगे श्रूयते एकदा स्वामीरामानन्दः द्वादशभिः शिष्यैः साकं रंगनाथधाम प्रवव्राज। रामानन्दस्य ख्यातिः सर्वत्र प्रसृता आसीत्। श्रीरंगनाथधाम्नि महाराजस्यागमनं पूर्वत एव संसूचितमभवत् तत्र जातिवादस्य, राजस्थ ब्राह्मणवादस्य च प्रचार आसीत्। रामानन्दस्य शिष्याः केचन ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राः अन्त्यजाश्चासन्। अतएव विरोधस्य स्वरः प्रस्फुटितः। स्वामिजीवस्य शिष्यः श्री रैदासः, कबीरश्च प्रसिद्धौ आस्ताम। तयोः जाति विषये च सन्देहः नासीत् रैदासः चर्मकारः कबीरश्च तन्तुवायः अतएव दृढः विरोधो जातः। श्री रामानन्दः विरोधं दृष्ट्वा प्रोवाच एते द्वादशभगवताः सिद्धाः मुक्ताश्च विद्यन्ते। एतेषां भक्तानां दर्शनं यूष्माभिः अभिमानराहित्येन कर्त्तव्यम्। समेषां शिष्याणां प्रच्छन्नः अवताररूपः प्रकटितो बभूव। विरोधिनः सर्वे श्री रामानन्दस्य चमत्कारं दृष्ट्वा चरणकमलयोः पातयामासुः। परमेश्वरः समेषां कृते समानभावेन दृष्टिगोचरो जायते तस्मात् उक्तं -

सर्वे प्रपत्तेरधिकारिणो मताः
शक्ता अशक्ता पदयोर्जगत्प्रभोः।
नोपेक्षते तव कुलं बलं च नो
न चापि कालो नहि शुद्धतापि वै॥[10]

श्री रामानन्द सम्प्रदाये भेदभावो न स्वीक्रियते। राष्ट्र सर्वत्र जातिप्रथायाः अस्पृश्यतायाश्च भावः चरमोत्कर्षे आसीत् तस्मिन् संक्रमणकाले भगवान् श्री रामानन्दः भक्तिमार्गेण सामाजिकानां सप्रमाणं निराकरणं कृतवान्।

श्रीरामानन्दस्योद्घोषो वर्तते -

ब्राह्मणाः क्षत्रियाः वैश्याः स्त्रियः शूद्रास्तथेतराः।
मन्त्राधिकारिणः सर्वे ह्यनन्यशरणा यदि।।[11]

आचार्यस्य प्रयासेन समाजे अस्पृश्यतायाः निवारणमभूत्। मन्दिरेषु सर्वेषां प्रवेशः सुनिश्चतः। किं बहुना तडागेषु कूपेष च सर्वे गन्तुं शक्यन्ते। श्री नारायणदासस्याश्रमे पञ्चशताधिक महात्मनः प्रायेण भोजनादिकं गृह्णन्ति किन्तु साधूनां मध्ये जातिव्यवस्थायाः गणना नैव दृश्यते। भक्ति श्रेष्ठा भवति भक्त्या उत्तमः भवति मनुष्यः भक्ति त्यागेन च अधमकोटौ परिगण्यते। श्रीरामचरितमानसे श्रूयते -

भगतिवंत अति नीचहु प्राणी।

मोहि प्राणप्रिय असि मम वानी॥

भगतिहीन विरंचि किम होई॥

सब जीवह सम प्रिय मम सोई॥

श्री रामानन्द संप्रदाये जातिवादस्य रूढपरम्परा न विद्यते। महाराजस्य शिष्या अपि सर्वस्यां जातौ विद्यते भोजनादिप्रसंगे च भेदः नैव कर्तुं शक्यते। अत्रापि इदं विशेषेण ध्येयं यत् भेदः नास्ति इत्यस्य तात्पर्य नेदं वर्तते यत् एकस्मिन् स्थालीपात्रे बहवः जनाः खादन्ति भोजनाय पात्रभेद अवश्यमेव दृश्यते भोजनस्य स्थालीपात्रं पृथक् पृथक् भवति। उच्छिष्ट भोजनस्य परम्परा नास्ति। उच्छिष्टान्नस्य बहिः प्रक्षेपः। यवनानां संस्कृतौ एकस्मिन् पात्रे अनेके जनाः खादन्ति किन्तु उदारतायाः काचिदपि अयमर्थः नास्ति कस्यापि उच्छिष्टभागस्य ग्रहणं भवेत् । एकस्यां पंक्तौ भोजनं भवत्येव।

## महापुरुषैः सह समागमः

सेवाधर्मः श्रेष्ठो धर्मः शास्त्रकारेण विज्ञापितः। त्रिवेणीधाम्नः प्रतिष्ठा साधसमाजे सर्वत्र प्रसृता अस्ति। देशस्य प्रसिद्धाः सन्तः महात्मनः विभूतयश्च समये समये आगच्छन्ति। महात्मनामागमनं विशिष्ट कार्यक्रमे भवति।

सत्संगतिः कथय किं न करोति पुंसाम्। सतां सज्जनानां संगः सत्संगः। महाराजः श्री नारायणदासः प्रायेण सर्वेषु प्रसिद्धतीर्थेषु भागवतकथायाः आयोजन कारयामास। कथावाचकाः भारतस्य प्रसिद्धाः दिगदिगन्त विश्रुताः आचार्याः भवन्ति स्म। महाराजस्य सम्प्रदाय प्रेम जगति सर्वे जानन्त्येव किंतु यदा सत्संगस्य विषयः भवति तत्र संप्रदायात् पृथक् कश्चित् ज्ञानोपासकः यदि सौभाग्यात् लभ्यते अवश्यमेव तं महापुरुष सादरं आह्वयति। कामं स शैवाचार्यो भवेत्। शाक्तः वा अन्यो वा। ज्ञानस्य परिधिर्नास्ति। तस्मात् सुप्रसिद्धाः स्वनामधन्याः शैवाचार्याः सन्यासिनः श्री हरिहरानन्दस्वामिनः (श्री करपात्र स्वामी महाराजः) एकदा त्रिवेणीधाम आजग्मुः। तस्मिन् समये पूर्वाचार्याः, श्री भगवानदासमहाराजाः आसन्। करपात्रस्वामिनः सेवायां श्रीनारायणदासमहाराजं नियोजयामास। कतिचिद्दिनानि यावत् महापुरुषाणां सेवां कृतवान्। सेवा मध्ये बहुकालं यावत् शास्त्राचार विषये गंभीरं चर्चा कृतवान्। श्री रामसुखदासस्य नाम को न जानाति गीतायाः साधकसंजीवनी भाष्यं विरचय्य संसारे अमरगाथां प्रसारयामास। श्री

रामसुखामहाराजेन सह काले काले सत्संग लाभः प्राप्तः। गीतायाः कठिनस्थलस्य च नैकधा चर्चा विहिता।

भारतराष्ट्र प्रसिद्धाः भागवताचार्याः श्रीरामकृष्ण डोगरे महाराजाः। श्री डोगरेजी महाराजेन सह सत्संगस्य महानवसरः लब्धः। महात्मनां नामभिः चर्चा कर्तुं नैव शक्यते। श्री अयोध्यायां अस्मिन् शताब्दे ये महात्मानः सुचरिताः अभूवन् तेषां प्रायेण सर्वेषां दर्शनलाभं महाराजः कृतवान्। रामानन्दसंप्रदायस्य ये मण्डलेश्वराः महान्तः विद्वांसश्च सन्ति ते काले काले अवश्यमेव आदृताः भवन्ति।

महाराजस्य कथनं वर्तते सम्प्रदाये अवश्यमेव निष्ठा स्थापनीया किन्तु अन्यस्मिन् संप्रदाये च ये धर्मज्ञाः आचारज्ञाः शास्त्रज्ञाः सन्ति तेषां वचनमवश्यमेव ग्राह्यम् मिथिलायाः रामानन्दसंप्रदायस्य प्रसिद्धः साधुः ब्रह्मलीन श्री शुकदेव दास महाराजः। श्री शुकदेव दासेन सह महाराजस्य मैत्रीभाव आसीत्। बहुकालं यावत् रामचरितमानसस्य चर्चा भवति स्म। दाक्षिणात्याः केचन रामानुजसंप्रदायवादिनाः माधवसंप्रदायाचार्याश्च श्री नारायणदासस्य यशोगाथां गायन्ति। सर्वेषां मते श्री नारायणदासः अतीव सरलस्वभावः विनीतः शान्तः निर्धूतकल्मषश्च वर्तते।

त्रिवेणीधाम्नि प्रायेण सर्वे संप्रदायवादिनः आगच्छन्ति शैवाचार्याः, वैष्णवाचार्याः, जैनसाधवः बौद्धाश्च। महाराजः श्री नारायणदासः जैनसाधभिः दिगम्बरैः, श्वेताम्बरैश्च साकं सत्संगं करोति। महाप्रज्ञेन सह प्रायेण चर्चा भवति

स्म। महाराजो वदति सत्पुरुषाणां संसर्गेण जनस्य भाग्यमुदेति। श्रीमद्भागवत महापुराणे माहात्म्यवर्णने श्री देवर्षि नारदस्य जीवनवृत्तं वर्णितमस्ति। नारदः स्वयमेव वृत्तान्तमुद्घाटयामास अहं दासी पुत्रः आसम्। चातुर्मास्य संपादनार्थे एको महात्मा समागतः। महात्मनः सेवायां नारदं नियोजयामास ग्रामीणः। नारदः श्रद्धानुसारं सेवां कृतवान्। तत्रैव महात्मनः उच्छिष्टशेषान्न भक्षणात् नारदस्य समस्तं जन्मजन्मान्तरीयं पापं विनष्टम्। सद्य एव मोहः विनष्टः। सत्पुरुषाणामागमनं अवश्यमेव हिताय भवति। सर्वप्रथमं ज्ञातव्यं वतते सतां संसर्गः पुण्यलाभाय भवति। सत्पुरुषाणां सेवा बहुभिः प्रकारैः सम्पाद्यते। उपदेशश्रवणं प्रथममवगम्यते। विद्यया संतृप्तः पुरुषः अन्यानपि उपदेशमाध्यमेनात्मसाक्षात्कारं कारयति। नारदस्य कथाश्रवणेन मनसि श्रेष्ठभाव उत्पद्यते। सत्पुरुषाणां यत् दैनन्दिनं पूजा होमादिकृत्यं भवति तेषु यथायोग्यं साहाय्यं विधेयम्।

महापुरुषस्योपदेशस्य क्रमः सहजेन स्वभावेन भक्तस्य उपकारं च विदधाति। तद्यथा एकदा समर्थगुरुरामदासः शिवजीमहाराजस्य नगरमाजगाम। शिवाजीमहाराजः मद्गर्वितो भूत्वाऽवोचत् - अहम् राज्ये बहुविधान् जनान सैनिकान् प्रजाः साधून् च भोजनादिदानेन संतर्पयामि। मम वैभवं ऐश्वर्यञ्च च समग्रे भूमण्डले प्रशस्यतमं विभाति।

दयालुः गुरु समर्थगुरुरामदासः झटितिरेव शिवजीमहोदयस्य कल्याणमभिलषन् एकं उत्कृष्टमुदाहरणं प्रदर्शयामास। तत्रैव भवनस्य प्राङ्गणे गोलाकारं पाषाणखण्डमासीत्। तत पाषाणखण्डं हस्तौ आदाय एकं पाषाणं द्वैधीभावं कारयामास। पाषाणमध्ये एकः मण्डूकः प्रसन्नेन चितः वसति स्म। महाराजः श्रीरामदासः प्रावोचत् अस्य मण्डूकस्य जीवनप्रदः, भोजनप्रदः, अन्नदश्च कोऽस्ति? किं त्वं अत्र भोजनादिकं प्रयच्छसि। महाराजस्य आशयं श्रुत्वा ज्ञात्वा च शिवाजीमहोदयस्य मोहः अहं भावश्च व्यपगतः। अयं भावः संसारे एकैव परमेश्वरः सर्वेषां जीवनप्रदः मंगलकारकश्च।

## हिन्दूधर्मश्य धर्मशास्त्रमूलको निर्णयः प्रतिपादनम्

वैष्णवसमाजे भागवतधर्मस्यानुशीलनं सर्वत्र भवति। भागवतधर्मः साक्षात परमेश्वरस्य धर्मः अस्ति यत्र भगवान् नारायणः केन्द्रे मन्यते।

विष्णुसहस्रनामावल्यां धर्मविषये काचित् जिज्ञासा कृता -

कोधर्मः सर्वधर्माणां धर्मोऽधिकतमो मतः।

किं जपन्मुच्यते जन्तुर्जन्म संसारबन्धनात्॥[12]

भीष्म उवाच -

जगत्प्रभु देवदेवमनन्तं पुरुषोत्तम्।

स्तुवन्नामसहस्रेण पठस्वेमं स्तुवं शुभम्॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।

ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।

लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।

लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥

एष मे सर्वधर्माणां धर्मोऽधिकतमोमतः॥

यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा॥

महाराभातस्येमे श्लोकाः प्रमाणभूताः वर्तन्ते यत् भगवतः नाम्नां स्मरणं जीवैरवश्यमेव कर्तव्यम्।

कलियुगे सर्वश्रेष्ठ धर्मः हरिस्मरणं प्रोक्तम्। विष्णोः अनेके अवताराः वन समग्रे विश्वे अवताराणां चर्चा प्रथिता। तथा च प्रकारान्तरेण स्तवनमाप जयते। श्रीमदभागवते भगवन्नामस्मरणविषये आग्रहः श्रूयते। यस्येश्वरस्य महिमा सर्वत्र प्रसृतः यदा तस्यानन्तानन्तपरमेश्वरस्य कीर्तनं क्रियते सद्य एव स भगवान् कीर्तनपरायणानां हृदि संप्रविश्य सकलं संकटं निराकरोति यथा सूर्योदेवः तमः वायुश्च मेघजालं विनाशयति। अयं भावः जापपरायणानां विपद् स्वयमेव इष्टो देवः गृह्णाति। भक्तस्य दुःखं स न सहते उक्तञ्च -

संकीर्त्यमानो भगवानन्तः

श्रुतानुभावो व्यसनं हि पुंसाम्।

प्रविश्यचित्तं विधुनोत्यशेषं

यथा तमोऽर्कोऽभ्रमिवाति वातः॥[13]

रामानन्दसम्प्रदाये विशेषेण भक्तिवादस्य समर्थनं दृश्यते। श्येन केनापि प्रकारेण भक्तिः कार्या। रामानन्दसंप्रदाये साधूनां बाहुल्यं वर्तते तत्रापि शास्त्ररीत्या कृतश्रमाः स्वल्पतरा एव भवन्ति। किन्तु भक्तिवादस्य समर्थकाः रामानन्दीया: पूर्वाचार्याणां आचारव्यवहारा साकल्येन परिलपायन्ति। आचारव्यवहारे च निष्णाता: साधवः यथाज्ञानं संप्रदायोचितं धर्मज्ञानं च पठति।

धर्मविषये शास्त्रेषु अनेके पन्थानः श्रूयन्ते तद्यथा -

चोदना लक्षणोऽर्थो धर्म:[14]

वेदबोधितेष्टसाधनताकोधर्म:[15]

पुन: मानव धर्मशास्त्रे -

विद्वद्भिः सेवित: सद्भिर्नित्यमद्वेषरागभिः।

हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥[16]

अयमर्थ: अद्वेषरागभि: महात्मभिः पुरुषै यः धर्म: सेवितः पोषितः स विधेयः। अन्यच्च -

वेद: स्मृति: सदाचार: स्वस्य च प्रियमात्मनः।

एतच्चतुर्विधं प्राहु : साक्षाद्धर्मस्य लक्षणम् ॥

वेदोऽखिलोधर्ममूलं स्मृतिशीले च तद्विदाम्।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

सम्पूर्णो ऋगादिवेदः धर्ममूलं वर्तते। वेदात् धर्मः प्रसिध्यति। मन्वादयः स्मतयश्च वेदे प्रमाणभूताः। स्मृतयः सन्ति अनेकाः तथापि वेदमूलकाः स्मृतय एव धर्मे प्रमाणभूताः इत्थं विस्तृतेन मीमांसा शास्त्रे स्मृत्याधिकरणे प्रतिपादितम्। अस्मिन् लोके आचारश्चैव साधूनाम् इति वाक्यं सर्वाधिक महत्वावहं विद्यते। पण्डिताना आचरः कदाचित् प्रमाणभूतं न मन्यते। पण्डितः शास्त्रज्ञाने कृतश्रमो भवति किन्तु शास्त्रस्याहं भावोऽपि तथैव भवति।

अस्य शोधप्रबन्धस्य मुख्यः प्रतिपाद्यो विषयः साधूनामाचार एव वर्तते। श्रीनारायणदास महोदयस्याचारः साधूनामाचारकोटावगच्छति अयमर्थः साधूनामाचारः धर्मे प्रमाणभूत इव अङ्गीकृतः। आचार इत्युक्ते व्यवहारो ज्ञेयः। यस्मिन्नाचारे शास्त्रस्य मर्यादावर्धते। संस्कृते प्रखरः उद्घोषः श्रूयते। स चाचारः अस्माकं धर्मे प्रमाणभूतः। शब्दान्तरेण कथितुं शक्यते साधूनामाचारः साक्षात् धर्मः भवति। विष्णुसहस्रनामावल्यामपि प्रोक्तं -

आचार प्रभवो धर्मः

धर्मस्य प्रभुश्च्युतः॥[17]

अयं भावः धर्मस्य प्रादुर्भावः आचारात् ज्ञायते। अर्थात् धर्म: आचारात् प्रभवति। अत्रापि एका शंका उदेति कस्याचार:?

अत्रैवाह भगवान् मनु: -

तस्मिन् देशे यः आचार: पारम्पर्यक्रमागतः।

वर्णानां सान्तरालानां स सदाचार उच्यते ॥[18]

अस्यार्यावर्तस्य निवासिनः यद् यदा चरंति परम्परया व्यवहरन्ति तत् सर्वं अस्माकं धर्म प्रमाणभूतं भवति। भारत भूमौ च देशविशेषस्याचार एव धर्मे प्रमाणभूतः। प्रकृतमनुसरामः महाराजस्य समस्तोऽपि व्यवहारः सर्वोत्कृष्टस्य धर्मस्य परिचायकः। महाराजः कर्मवादस्य समर्थको विभाति। सर्वत्र धर्मसंसदि वदति सत्कर्मणा सर्वं सिद्ध्यति कर्ममार्गः प्रामुख्येन पालनीयः। हरिः स्मरणं, नामजपः, ध्यानं, कीर्तनादिकं यत् किमपि वर्तते तत् सर्वं कर्मवादस्य प्रकारान्तरेण समर्थनं करोति।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।[19]

यदि मनुष्यस्य कर्म पूर्वाग्रहराहित्यं प्रवर्तेत तत् कर्म भक्तियोगाद्विशिष्यते। कथनस्याभिप्रायो वर्तते कर्ममूले संकल्पः भवेत् अस्माकं प्रवर्तमानं कर्म सामाजिकानां हिताय, राष्ट्रकल्याणाय, जगद्धिताय च वर्तते। अयं सत्य संकल्पः कर्मकर्तृन् जनान् बन्धनात् मोचयति तस्मात् उक्तं च शिवमहिम्न स्तोत्रे -

यद्यत् कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्[20]

कर्मवादस्यायं सिद्धान्तः उत्कृष्टः प्रतिभाति यत्र स्वयमेव कर्म ईश्वरस्य आराधना भवति । ईश्वराराधनाय पृथक् पूजायाः प्रयोजनमेव न दृश्यते। महाराजस्य कर्मवादः राष्ट्रस्य श्रीवृद्धये श्रेष्ठं प्रतिभाति।

प्रभुप्रीत्यर्थं सर्व कर्म विधेयम्। प्रभुप्रीत्यर्थं कर्म कथं स्यात् इति अस्य सम्यक् उदाहरणं द्रष्टुं शक्यते –

एक: सामान्यः जनः पाकं पचति पाक क्रियायां सन्नद्धोऽसौ यथावित्तं यथासामर्थ्यं च बहुविधं पचति । कश्चित् प्रतिवेशी आगत्य पप्रच्छ किं करोषि? स साक्षात् उत्तरं ददाति पाकं करोमि स्वपुत्राय, पौत्राय, अथवा आत्मने।

अस्मिन् उत्तरे स्वार्थस्यः अज्ञानस्य, तुच्छविचारस्य चावलोकनं कर्तुं शक्यते तत्रैव वैष्णवस्य गृहे कश्चित् पाक कर्मणि नियुक्तोस्ति कश्चित् अन्यद् आगत्य पृच्छति किं करोषि ? तस्य पाचकस्योत्तरं भवति - भगवते रामाय कृष्णाय, स्वेष्टदेवाय च पाकं करोमि। उभयत्र कर्म प्रवर्तते सममेव कर्म तथापि

उत्तरं द्विधा विभक्तम्। अत्रापि यः पाकः भवति परोक्षवृत्या पुत्राय, पौत्राय, स्वात्मने च तथापि पाचकः स्वसंस्कार प्रदर्शयन्नाह भगवते पचामि।

महाराजस्य कर्मवादः तथैव वर्तते सर्वं खलु कर्म ईश्वर प्रीतये विधेयम्। ईश्वरः सर्व पश्यति। अनेन प्रकारेण कर्तृत्वाभिमानो नो जायते। कर्तृत्वाभिमाने सति बन्धः स्वयमेव भवति। महाराजस्य धर्मसंकटे एकमेवादेश: वर्तते –

परोपकाराय पुण्याय।

परोपकाराय सतां विभूतयः।

परहित सरिस धरम नहिं भाई।

सन्दर्भग्रन्थाः –


1. शुक्लयजुर्वेद संहिता १०-२
2. शुक्लयजुर्वेद संहिता २२.२२
3. 'शुक्लयजुर्वेद संहिता ९.३३
4. 'ईशोपनिषद् १ मन्त्रः
5. 'शुक्लयजुर्वेद संहिता
6. शुक्लयजुर्वेदसंहिता ३६ अध्यायः
7. 'शुक्लयजुर्वेदसंहिता - १.४
8. मनुस्मृतिः
9. वैष्णवमताब्जभास्करः
10. 'वैष्णवमताब्जभास्करः ४-५१
11. 'हारीत स्मृतिः।
12. 'विष्णुसहस्रनामावली
13. श्रीमद्भागवतपुराणम्
14. मीमांसासूत्रम्
15. अर्थसंग्रहः
16. मनुस्मृतिः
17. विष्णुसहस्रनाम - फलश्रुतिः।
18. 'मनुस्मृतिः।
19. श्रीमद्भगवद्गीता
20. शिवमहिम्नस्तोत्रम्